**चरण-षष्ठम्, कार्यक्रमः- 03**

**एकसाप्ताहिक-ऑनलाइन-राष्ट्रीय सङ्कायविकासकार्यक्रमः (एफ.डी.पी.)**

# भारतीयदर्शनं-मनोविज्ञानञ्च : राष्ट्रियशिक्षानीति २०२० सन्दर्भे

**(Indian Philosophy & Psychology: In the context of NEP-2020)**

13-17 जून 2022 पर्यन्तम्

## संक्षिप्तप्रतिवेदनम्

भारतसर्वकारस्य शिक्षामंत्रालयस्य बहुआयामिपरियोजना **पण्डितमदनमोहनमालवीयराष्ट्रीयशिक्षकशिक्षणमिशनमित्यस्य** अन्तर्गतत्वेन स्थापितेन **नवदेहलीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय** (केन्द्रीयविश्वविद्यालयः) **शिक्षणाधिगमकेन्द्रण** षष्ठमचरणस्य **'भारतीयदर्शनं-मनोविज्ञानञ्च : राष्ट्रियशिक्षानीति २०२० सन्दर्भे'** इति विषय तृतीय साप्ताहिक-ऑनलाइन-राष्ट्रिय सङ्कायविकासकार्यक्रमस्यायोजनं 2022 तमवर्षस्य जून मासस्य 13 तः 17 दिनाङ्कपर्यन्तं कृतम्। कार्यक्रमस्य मुख्योद्देश्यानि भारतीयदर्शनानि (न्याय-सांख्य-योग-वेदान्तादि) एवं तेषां शैक्षिकनिहितार्थस्य सम्प्रत्ययात्मकावबोधस्य विकसनम्, भारतीयपरिप्रेक्ष्ये शैक्षिकमनोविज्ञानस्य विविधसम्प्रत्ययेषु (चेतना-बुद्धि-व्यक्तित्व-मूल्य-मानसिक-स्वास्थ्यादि) अन्तर्दृष्टेः विकसनम्, समग्रविकासार्थं भारतीयदर्शनस्य मनोविज्ञानस्य च प्रयोगानुप्रयोगकरणम्, भारतीयदर्शन एवं मनोविज्ञानाधारित नवाचारिकाभ्यासानामन्वेषणम्। ऑनलाइनकार्यक्रमस्य सञ्चालनं गूगलमीट इत्यस्य मञ्चे कृतम्। उद्घाटनसत्र शिक्षणाधिगमकेन्द्रस्य निदेशका **प्रो. अमितापाण्डेयभारद्वाज** महोदयया स्वागतभाषण कार्यक्रमस्य सन्दभाः च प्रस्तुताः। कार्यक्रमः 28 सत्रेषु सम्पन्नं तानि यथा- उद्घाटन-उद्बोधन, 14 प्रदर्शनाधारित तकनीकी सत्राणि, 05 प्रश्नोत्तर सत्राणि, 05 स्वाभ्यास सत्राणि, ऑनलाइनाकलन-प्रतिपुष्टि -अनुभवकथनसत्र समापनादीनि सत्राणि च। कार्यक्रमऽस्मिन् 79 प्रतिभागिभिः पञ्जीकरण कारितम् एवञ्च सर्वैः सफलतापूर्वक भागग्रहणं कृतम्। 79 प्रतिभागिषु 67 प्रतिभागिनः अष्टादश राज्येभ्यः, 12 प्रतिभागिनः एककेन्द्रशासितप्रदेशतः प्रतिभागं कृतवन्तः। अष्टादश राज्येषु आंध्रप्रदेशतः 03, असमतः 01, बिहारतः 05, गुजराततः 01, हरियाणातः 11, झारखण्डतः 02, कर्नाटकतः 02, मध्यप्रदेशतः 01, महाराष्ट्रतः 07, ओडिशातः 01, पंजाबतः 01, राजस्थानतः 04, तमिलनाडुतः 05, तेलङ्गानातः 01, त्रिपुरातः 01, उत्तराखण्डतः 07, उत्तरप्रदेशतः 10, पश्चिमबंगालतः 04 एवञ्च केन्द्रशासितप्रदेश देहलीतः 12 प्रतिभागिन आसन्। तकनीकीसत्राणां सञ्चालन शोधक्षेत्र निष्णातानां देशस्य प्रतिष्ठितानां संस्थानानां **द्वादशविशेषज्ञानां** कुशलमार्गदर्शन कृतम्। एतेषु सत्रेषु मुख्यविषयत्वेन पाठिताः अंशाः एन.ई.पी.-2020: भारतीयज्ञानप्रणाल्याः सन्दर्भे दर्शनं-मनोविज्ञानञ्च, स्मृति-एकाग्रताविषये नादयोगस्य भूमिका, भारतीयज्ञानप्रणाल्याः सन्दर्भे व्यक्तित्वाभिवृत्तिमध्ये सामञ्जस्यम्, वैदिकमनोविज्ञानस्य परिचयः, भारतीयदर्शनस्य ज्ञानमीमांसा, शिक्षायाः मनोवैज्ञानिकं दर्शनं राष्ट्रियशिक्षानीति 2020 च, समग्रविकासाय नवाचारिकाभ्यासाः, भारतीयपरिप्रेक्ष्ये मानवीयव्यक्तित्वं, उपनिषददृष्ट्या मानवीयमस्तिष्क एवं व्यवहारस्यावबोधः, वैदिकदर्शनम्। प्रतिभागिनां कृते तकनीकी सत्रेषु पठितांशानामाधरेण 14 चयनाधारितानि प्रदत्तकार्याणि दत्तानि। अन्ते च ऑनलाइन परीक्षणमपि कृतं यस्मिन् 57 प्रतिशतं प्रतिभागिनः 50 प्रतिशततः उपरि एव अङ्कान् प्राप्तवन्तः। अस्मिन्नेव क्रमे प्रतिभागिनां दृष्ट्या प्रदत्तानां व्याख्यानानां गुणवत्तायाः निश्चितीकरणाय विषय-विशेषज्ञानां सन्दर्भेऽपि ऑनलाइनप्रतिपुष्टिः चतुश्श्रेणीषु- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकञ्च** एवं रूपेण कारितम् तथा च तेषाम् औसतम् 68%, 22%, 09% एवं 01% क्रमशः प्राप्ताः। अनेन साकं कार्यक्रमस्य सन्दर्भे ऑनलाइनप्रतिपुष्टिः 10 बिन्दूनां पञ्चश्रेण्यां प्राप्त। यथा- **उत्कृष्टम्, अति-उत्तमम्, उत्तमम्, संतोषजनकम्, असंतोषजनकं च**। एते 10 बिन्दनां प्राप्तश्रेण्यां औसतं प्रतिशते 67% उत्कृष्टम्, 25% अति-उत्तमम्, 07% उत्तमम्, 01% संतोषजनकम्, 00% असंतोषजनकं च प्राप्तम्। समापनसत्र निदेशकया गणमान्यातिथीनां स्वागतं कार्यशालाप्रतिवेदनं च प्रस्तुतम्। तत्पश्चात् **प्रो. देवदत्तशर्ममहोदयानां** (कुलपतिः, सरदारपटेलविश्वविद्यालयः, मण्डी, हिमाचलप्रदेशः) मुख्यातिथीनां सम्बोधनम् अध्यक्षीयभाषणं माननीयानां **प्रो. मुरलीमनोहरपाठकवर्याणां** (कुलपतिः, श्रीला.ब.शा.रा. सं.वि.वि. नवदेहली) च जातम्। धन्यवादज्ञापनन शान्तिपाठेन च कार्यक्रम सम्पन्नतां गता। कार्यक्रमः समापनान्तरं सफलप्रतिभागिनां ई-चित्रावली ई-प्रमाणपत्राणि च मेलद्वारा सम्प्रेषितानि।